जम्भारिः, पुं, ( जम्भस्यासुरस्य अरिः शत्रुः । ) इन्द्रः । यथा, "जम्भारिदम्भोलयः ।" इत्युत्तरनैषधम् ॥ वह्निः । वज्रम् । इति विश्वः ॥ ( विष्णुः । इति महाभारतम् ॥)

जम्भी, [ न् ] पुं, ( जम्भयति सुधामाम्लादिकं नाशयतीति । जभि क नाशे+णिनिः । ) जम्भीरः । इति शब्दचन्द्रिका ॥

जम्भीरः, पुं, ( जभ्यते अभिरुच्यर्थं भक्ष्यते इति । जभ+"गम्भीरादयश्च ।" इति ईरन् । ततो "रधिजभोरचि ।" ७ । १ । ६१ । इति नुम् ।) जम्बीरः । इत्यमरः । २ । ४ । ७६ ॥ मरुवकः । इति तट्टीकायां भरतः ॥

जयः, पुं, ( जि जये+"एरच् ।" ३ । ३ । ५६ । इत्यच् । ) शत्रुपराङ्मुखीकरणम् । जित् इति भाषा । तत्पर्य्यायः । विजयः २ जयनम् ३ । इत्यमरः । २ । ८ । १० ॥ (यथा, मनुः ।७।४४ ।
"इन्द्रियाणां जये योगं समातिष्ठेद्दिवानिशम् ।
जितेन्द्रियो हि शक्नोति वशे स्थापयितुं प्रजाः ॥")
अग्निमन्थः । (जयतीति । जि+पचाद्यच् ।) जयन्तः । युधिष्ठिरः । इति मेदिनी । ये,२५ ॥ (एतन्नाम तु विराटगृहे छद्मप्रवाससमये जातम् । यथा, महाभारते । ४ । ५ । ३४ ।
"जयो जयन्तो विजयो जयत्सेनो जयद्बलः ।
इति गुह्यानि नामानि चक्रे तेषां युधिष्ठिरः ॥")
विजयनन्दनराजः । स तु इक्ष्वाकुवंशोद्भवः । इति हेमचन्द्रः । ३ । ३५८ ॥ श्रीनारायणपार्षदः । यथा,—
"एतौ तौ पार्षदौ मह्यं जयो विजय एव च ।
कदर्थीकृत्य मां यद्वो बह्वक्रातामतिक्रमम् ॥"
इति श्रीभागवते । ३ । १६ । २ ॥
(सर्व्वाणि भूतानि जयतीति । जीयते संसारमनेन वा । विष्णुः । यथा, महाभारते । १३ । १४९ । ६७ ।
"नयो जयः सत्यसन्धो दाशार्हः सात्वतां पतिः ॥"
नागविशेषः । यथा, महाभारते ।५।१०३।१६ ।
"विरजा धारणश्चैव सुबाहुर्मुखरो जयः ॥"
दानवविशेषः । यथा, हरिवंशे । २३४ । ८३ ।
"जयो निकुम्भः कुमथश्च दानवो
ररक्षुरेते दश दानवाधिपम् ॥"
दशममन्वन्तरीय-ऋषिविशेषः । यथा, भागवते । ८ । १३ । २१—२२ ।
"दशमो ब्रह्मसावर्णिरुपश्लोकसुतो मनुः ॥"
"हविष्मान् सुकृतः सत्यो जयो मूर्त्तिस्तदा द्विजाः ॥"
भुवर्वंशीयस्य वत्सरनृपस्य पुत्रविशेषः । यथा, तत्रैव । ४ । १३ । १२ ।
"सर्व्वर्त्तिर्वत्सरस्येष्टा भार्य्यासूत षडात्मजान् ।
पुष्पार्णं तिग्मकेतुञ्च इषमूर्जं वसुं जयम् ॥"
विश्वामित्रपुत्रविशेषः । ( यथा, तत्रैव । ९ । १६ । ३६ ।
"एष वः कुशिका वीरो देवरातस्तमन्वित ।
अन्ये चाष्टकहारीतजयक्रतुमदादयः ॥"
ऊर्व्वशीगर्भजातः पुरूरवसः पुत्रविशेषः । यथा, तत्रैव । ९ । १५ । १ ।
"ऐलस्य चोर्व्वशीगर्भात् षडासन्नात्मजा नृप ! ।
आयुः श्रुतायुः सत्यायू रयोऽथ विजयो जयः ॥"
राजर्षिविशेषः । यथा, महाभारते । २।८।१४ ।
"तस्मै राजर्षयः पुण्यास्तथा ब्रह्मर्षयोऽमलाः ।
यमं वैवस्वतं तात ! प्रहृष्टाः पर्य्युपासते ॥"
इत्युपक्रम्याह ।
"अङ्गो विष्णुश्च वेणश्च दुष्मन्तः सृञ्जयो जयः ॥"
धृतराष्ट्रपुत्राणामन्यतमः । यथा, तत्रैव । १ । ६३ । ११७ ।
"जयः सत्यव्रतश्चैव पुरुमित्रश्च भारत ! ॥"
सृञ्जयस्य राज्ञः पुत्रः । यथा, हरिवंशे । २९ । २ ।
"सृञ्जयस्य जयः पुत्रो विजयस्तस्य चात्मजः ॥"
सञ्जयस्य राज्ञः पुत्रः । यथा, भागवते । ९ । १७ । १६ । [जयः ॥"
"कुशात् प्रतिः षात्वहात् सञ्जयस्तत सुतो
सौमन्तिमैन्योः पुत्रविशेषः । यथा, तत्रैव । ९ । २१ । १ ।
"वितथस्य सुतात् मन्योर्बृहत्क्षत्रो जयस्ततः ॥"
युयुधानपुत्रः । यथा, तत्रैव । ९ । २४ । १४ ।
"युयुधानः सात्यकिर्व्वै जयस्तस्य कुणिस्ततः ॥"
भारतादिशास्त्रविशेषः । यथा, भविष्यपुराणे ।
"अष्टादशपुराणानि रामस्य चरितं तथा ।
विष्णुधर्म्मादिशास्त्राणि शिवधर्म्माश्च भारत ! ॥
कार्ष्णञ्च पञ्चमो वेदो यन्महाभारतं स्मृतम् ।
सौराश्च धर्म्मा राजेन्द्र ! मानवोक्ता महीपते ! ॥
जयेति नाम एतेषां प्रवदन्ति मनीषिणः ॥"
इतिच्छन्दारत्नम् । इति शब्दार्थचिन्तामणिः ॥ वत्सरविशेषः । तत्फलं यथा,—
"क्षत्रियाश्च तथा वैश्याः शूद्राश्च नटनर्त्तकाः ।
पीडितास्ते वरारोहे ! जये सर्व्वे न संशयः ॥")

जयकोलाहलः, पुं, ( जयस्य कोलाहलो यत्र । ) पाशकभेदः । इति शब्दरत्नावली ॥ (जयस्य कोलाहलः ।) जयध्वनिश्च ॥

जयढक्का, स्त्री, ( जयघोषिका ढक्का । विजयकाले एव वादनादस्य तथात्वम् । ) वाद्यविशेषः । इति लोकप्रसिद्धा । जयढाक इति भाषा ॥

जयदत्तः, पुं, ( जयेन विजयेन दत्त इव । जयशीलत्वादेवास्य तथात्वम् । ) इन्द्रपुत्रः । इति हेमचन्द्रः । २ । ८९ ॥

जयनं, क्ली, ( जीयतेऽनेनेति । जि+करणे ल्युट् ।) तुरङ्गादिसन्नाहः । ( यथा, माघे ।१७।२३ ।
"सकलमं द्विरदगणं वरूथिन-
स्तुरङ्गिणो जयनयुजश्च वाजिनः ।
त्वरायुजः स्वयमपि कुर्व्वतो नृपाः
पुनः पुनस्तदधिकृतानतत्वरन् ॥"* ॥
भावे ल्युट् । ) जयः । इति मेदिनी । ने, ६७ ॥

जयनी, स्त्री, ( जयन+स्त्रियां ङीप् । ) इन्द्रकन्या । इति शब्दरत्नावली ॥

जयन्तः, पुं, ( जयतीति । जि+"तॄभूवहिवसीति ।" उणां ३ । १२८ । इति झच् । ) इन्द्रपुत्रः । तत्पर्य्यायः । पाकशासनिः २ । इत्यमरः । १ । १ । ४९ ॥ ऐन्द्रिः ३ । इति मेदिनी । ते, ११० । (यथा, रघौ । ३।२३ ।
"उमावृषाङ्कौ शरजन्मना यथा
यथा जयन्तेन शचीपुरन्दरौ ।
तथा नृपः सा च सुतेन मागधी
ननन्दतुस्तत्सदृशेन तत्समौ ॥"
विष्णुः । यथा, महाभारते । १३ । १४९ । ८९ ।
"अर्को वाजसनः शृङ्गी जयन्तः सर्व्वविज्जयी ॥"
"अतिशयेनारीन् जयति जयहेतुरिति वा जयन्तः ।" इति तद्भाष्यम् ॥) शिवः । (यथा, मात्स्ये । ५ । ३० ।
"सावित्रश्च जयन्तश्च पिनाकी चापराजितः ।
एते रुद्राः समाख्याता एकादशगणेश्वराः ॥")
चन्द्रः । इति त्रिकाण्डशेषः ॥ भीमः । इति मेदिनी । ते, ११० ॥ (एतन्नाम तु छद्मना विराटगृहवासकाले जातम् । यथा, महाभारते । ४ । ५ । ३४ ।
"जयो जयन्तो विजयो जयत्सेनो जयद्बलः ।
इति गुह्यानि नामानि चक्रे तेषां युधिष्ठिरः ॥"
मरुत्वतीगर्भजातो धर्म्मपुत्रविशेषः । अयं हि उपेन्द्र इत्याख्यया प्रसिद्धः । यथा, भागवते । ६ । ६ । ८ ।
"मरुत्वांश्च जयन्तश्च मरुत्वत्या बभूवतुः ।
जयन्तो वासुदेवांश उपेन्द्र इति यं विदुः ॥"
राज्ञो दशरथस्य मन्त्रिविशेषः । यथा, रामायणे । १ । ७ । २—३ ।
"अष्टौ बभूवुर्वीरस्य तस्यामात्या यशस्विनः ।
शुचयश्चानुरक्ताश्च राजकृत्येषु नित्यशः ॥
धृष्टिर्जयन्तो विजयः सुराष्ट्रो राष्ट्रवर्द्धनः ।
अकोपो धर्म्मपालश्च सुमन्त्रश्चाष्टमोऽर्थवित् ॥"
पर्व्वतविशेषः । यथा, हरिवंशे ।१७०।१४ ।
"ततश्च पर्व्वताः सप्त कैलासं समुपस्थिताः ।
जयन्तो वैजयन्तश्च नीलो रजतपर्व्वतः ।
महामेरुः सकैलास इन्द्रकूटश्च नामतः ॥"
ज्योतिषोक्तयात्रिकयोगविशेषः । यथा,—
"यत्र स्वोच्चगतश्चन्द्रो लग्नादेकादशे स्थितः ।
जयन्तो नाम योगोऽयं शत्रुपक्षविनाशकृत् ॥")
षोड़शध्रुवकान्तर्गतध्रुवविशेषः । तस्य लक्षणं यथा,—
"आदितालेन जयन्तः स्यात् शृङ्गाररससंयुतः ।
द्वन्द्वसंख्याक्षरपद आयुर्वृद्धिकरः परः ॥"
इति सङ्गीतदामोदरः ॥

जयन्तिका, स्त्री, ( जयन्तीव कायतीति । कै+कः । ततो ह्रस्वो निपातनात् । ) हरिद्रा । इति राजनिर्घण्टः ॥ ( दुर्गायाः सखीविशेषः । यथा, काशीखण्डे । ४७ । ४६ ।
"यथा जया च विजया यथा चैव जयन्तिका ॥")

जयन्ती, स्त्री, (जयतीति । जि+"तॄभूवहीति ।" उणां ३ । १२८ । इति झच् । ततो गौरा-